# Shri Mukundavandana Ashtakam

# શ્રીમુકુન્દવન્દનાષ્ટકમ્

## Document Information

Text title : Shri Mukundavandana Ashtakam

File name : mukundavandanAShTakam.itx

Category : vishhnu, nimbArkAchArya, krishna, aShTaka

Location : doc_vishhnu

Author : vAsudvasharaNa upAdhyAya

Proofread by : Mohan Chettoor

Latest update : January 28, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 28, 2023

*sanskritdocuments.org*

Shri Mukundavandana Ashtakam

# શ્રીમુકુન્દવન્દનાષ્ટકમ્

દેવં પ્રપન્નાર્તિહરં શરણ્યં સત્યં ચિદાનન્દમયસ્વરૂપમ્ ॥

મુક્તોપસૃપ્યં નવનીરદાભં શ્રીમન્મુકુન્દં પ્રણમામિ નિત્યમ્ ॥ ૧॥

સૌશીલ્યવાત્સલ્યગુણાઢ્યમીશં કુઞ્જેશ્વરં રાસવિહારશીલમ્ ॥

સખીસમૂહૈઃ પરિગીયમાનં શ્રીમન્મુકુન્દં પ્રણમામિ નિત્યમ્ ॥ ૨॥

માધુર્યભાવે મધુરસ્વરૂપમૈશ્વર્યભાવે ભગવત્સ્વરૂપમ્ ॥

વાત્સલ્યભાવે ચ સુબાલરૂપં શ્રીમન્મુકુન્દં પ્રણમામિ નિત્યમ્ ॥ ૩॥

વૃન્દાવને નિત્ય-નિકુઞ્જમધ્યે રસાત્મકં રાસવિહારિરૂપમ્ ।
બ્રહ્મેશવૃન્દારકવૃન્દવન્દ્યં શ્રીમન્મુકુન્દં પ્રણમામિ નિત્યમ્ ॥ ૪॥

મોક્ષપ્રદાનાદ્ધિ મુકુન્દસંજ્ઞં જ્ઞાનક્રિયાશક્તિબલાદિપૂર્ણમ્ ॥

સઞ્ચિન્તનીયં શરણં પ્રપન્નૈઃ શ્રીમન્મુકુન્દં પ્રણમામિ નિત્યમ્ ॥ ૫॥

ધ્યેયં કુમારૈઃ સુમનોભિરાદ્યં ગેયં વચોભિર્મુનિનારદાદ્યૈઃ ॥

આચાર્યવર્યૈશ્ચ સમર્ચનીયં શ્રીમન્મુકુન્દં પ્રણમામિ નિત્યમ્ ॥ ૬॥

યત્પાદપદ્માશ્રયણાદ્ વિલીના ભવન્તિ જન્માદિવિકારભાવાઃ ।
તં સર્વપૂજ્યં પરમં વરેણ્યં શ્રીમન્મુકુન્દં પ્રણમામિ નિત્યમ્ ॥ ૭॥

વાણી મુકુન્દસ્ય ગુણાન્ ગૃણાતુ મનસ્તુ તસ્યાઙ્ઘ્રિયુગં વૃણોતુ ।
કરૌ સદા પૂજનતત્પરૌ સ્તામન્યાનિ ચાઙ્ગાનિ ફલીભવન્તુ ॥ ૮॥

-વાસુદેવશરણ ઉપાધ્યાય, પ્રાચાર્ય-
શ્રીસર્વેશ્વર સંસ્કૃત મહાવિદ્યાલય
નિમ્બાર્કતીર્થ-સલેમાબાદ, જિ૦ અજમેર (રાજ૦)

ઇતિ વાસુદેવશરણ ઉપાધ્યાયવિરચિતં શ્રીમુકુન્દવન્દનાષ્ટકમ્

Proofread by Mohan Chettoor

*Shri Mukundavandana Ashtakam*

pdf was typeset on January 28, 2023

Please send corrections to *sanskrit@cheerful.com*